# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – आचार्य: (SEM-2)** **प्रश्नपत्रम् – 4** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.C.4.2.6** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –13/04/2019 सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणे दशमस्कन्ध-उत्तरार्धः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 कस्यचिदेकस्य ससन्दर्भं व्याख्या कार्या। 05**

(1) जरासुतस्तावभिसृत्य माधवौ महाबलौघेन बलीयसाऽऽवृणोत्।
ससैन्ययान् ध्वजवाजिसारथीसूर्यानलौ वायुरिवाभ्ररेणुभिः ।।

(2) पृथां समागत्य कृताभिवादनस्तयातिहार्द्रदृशाभिरम्भितः।
आपृष्टवांस्तां कुशलं सहस्नुषां पितृष्वसारं परिपृष्ट बान्धवः ।।

**प्रश्नः-2 एकः सप्रसङ्गं विवेचयत। 10**

(1) रुक्मिण्युद्वाहप्रस्तावं वर्णयत।

(2) स्यमन्तकोपाख्यानम्।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 कस्यचिदेकस्य ससन्दर्भं व्याख्या कार्या। 05**

(1) नमामि त्वाऽनन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम्।
विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद् ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ।।

(2) दृष्टं तवाङ्घ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृदि विचिन्त्यमगाधबोधैः।
संसारकूपपतितोत्तरणावलम्बं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिस्स्यात् ।।

**प्रश्नः-4 भगवतः श्रीकृष्णस्य बाणासुरेण साकं युद्धं वर्ण्यताम्। 10**

**अथवा**

**देवर्षिनारदकृतं श्रीकृष्णस्य गार्हस्थ्यदर्शनं निरूपयत।**

### तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 कस्यचिदेकस्य ससन्दर्भं व्याख्या कार्या। 05**

(1) कृष्ण कृष्णाप्रमेयात्मन् प्रपन्नभयभञ्जन।
वयं त्वां शरणं यामोभवभीताः पृथग्धियः ।।

(2) नमस्ते देवदेवेश प्रपन्नार्तिहराव्यय।

प्रपन्नान् पाहि नः कृष्ण निर्विण्णान् घोरसंसृतेः॥

**प्रश्नः-6 पाण्डवद्वारा कृतं राजसूययज्ञस्य वर्णनं कुरुत।** **10**

**अथवा**

**जरासन्धवधप्रसंगं यथाग्रन्थं विवेचयत।**

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 एकां टिप्पणीं लिखत।** **05**

(1) तीर्थयात्रावर्णनम्।

(2) सुभद्राहरणम्।

**प्रश्नः-8 पद्यमेकं विवेचयत।** **10**

(1) नमोस्तु तेध्यात्मविदां परात्मनेअनात्मने स्वात्यविभक्तमृत्यवे।

सकारणाकारणलिङ्गमीयुषे स्वमायया संवृत्तरुद्धदृष्टये॥

(2) भवान् हि सर्वभूतानामात्मा साक्षी स्वहग्विभो।

अथ नस्त्वपदाम्भोजं स्मरतां दर्शनं गतः॥

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) भागवते कति स्कन्धाः?

(2) दशमस्कन्धे उत्तरार्धे कति अध्यायाः?

(3) विदर्भदेशस्य अधिपतिः कः?

(4) स्यमन्तकमणेः केन हरणं कृतम्?

(5) सत्याः पितुः नाम किम्?

(6) रुक्मिणीनन्दनः कः?

(7) बाणासुरस्य पुत्र्याः नाम किम्?

(8) नृगराजा कस्मिन् वंशे उत्पन्नः?

(9) यमुनाकर्षणं केन कृतम्?

(10) जरासन्धस्य वधः केन कृतः?

(11) शिशुपालस्य सखा कः?

(12) श्रीकृष्णस्य परम सखा कः?

(13) सुभद्राहरणं केन कृतम्?

(14) श्रीमद्भागवतमहापुराणे कति श्लोकाः?

(15) श्रीमद्भागवतमहापुराणे मुख्यः वक्ता कः?